# ॥ अर्धनारीश्वराष्टोत्तरशतनामस्तोत्रम् ॥

चामुण्डिकाम्बा श्रीकण्ठः पार्वती परमेश्वरः ।
महाराज्ञी महादेवः सदाराध्या सदाशिवः ॥ १ ॥

शिवार्धाङ्गी शिवार्धाङ्गो भैरवी कालभैरवः ।
शक्तित्रितयरूपाढ्या मूर्तित्रितयरूपवान् ॥ २ ॥

कामकोटि-सुपीठस्था काशीक्षेत्रसमाश्रयः ।
दाक्षायणी दक्षवैरिः शूलिनी शूलधारकः ॥ ३ ॥

ह्रीङ्कारपञ्जरशुकी हरिशङ्कररूपवान् ।
श्रीमद्गणेशजननी षडानन-सुजन्मभूः ॥ ४ ॥

पञ्चप्रेतासनारूढा पञ्चब्रह्मस्वरूपभृत् ।
चण्डमुण्डशिरश्छेत्री जलन्धरशिरोहरः ॥ ५ ॥

सिंहवाहा वृषारूढः श्यामाभा स्फटिकप्रभः ।
महिषासुरसंहर्त्री गजासुरविमर्दनः ॥ ६ ॥

महाबलाचलावासा महाकैलासवासभूः ।
भद्रकाली वीरभद्रो मीनाक्षी सुन्दरेश्वरः ॥ ७ ॥

भण्डासुरादिसंहर्त्री दुष्टान्धकविमर्दनः ।
मधुकैटभसंहर्त्री मधुरापुरनायकः ॥ ८ ॥

कालत्रयस्वरूपाढ्या कार्यत्रयविधायकः ।
गिरिजाता गिरीशश्च वैष्णवी विष्णुवल्लभः ॥ ९ ॥

विशालाक्षी विश्वनाथः पुष्पास्त्रा विष्णुमार्गणः ।
कौसुम्भवसनोपेता व्याघ्रचर्माम्बरावृतः ॥ १० ॥

मूलप्रकृतिरूपाढ्या परब्रह्मस्वरूपवान् ।
रुण्डमालाविभूषाढ्या लसद्रुद्राक्षमालिकः ॥ ११ ॥

मनोरूपेक्षुकोदण्डा महामेरुधनुर्धरः ।
चन्द्रचूडा चन्द्रमौलिर्महामाया महेश्वरः ॥ १२ ॥

महाकाली महाकालो दिव्यरूपा दिगम्बरः ।
बिन्दुपीठसुखासीना श्रीमदोङ्कारपीठगः ॥ १३ ॥

हरिद्राकुङ्कुमालिप्ता भस्मोद्धूलितविग्रहः।
महापद्माटवीलोला महाबिल्वाटवीप्रियः॥ १४॥

सुधामयी विषधरो मातङ्गी मकुटेश्वरः।
वेदवेद्या वेदवाजी चक्रेशी विष्णुचक्रदः॥ १५॥

जगन्मयी जगद्रूपो मृडानी मृत्युनाशनः।
रामार्चितपदाम्भोजा कृष्णपुत्रवरप्रदः॥ १६॥

रमावाणीसुसंसेव्या विष्णुब्रह्मसुसेवितः।
सूर्यचन्द्राग्निनयना तेजस्त्रयविलोचनः॥ १७॥

चिदग्निकुण्डसम्भूता महालिङ्गसमुद्भवः।
कम्बुकण्ठी कालकण्ठो वज्रेशी वज्रिपूजितः॥ १८॥

त्रिकण्टकी त्रिभङ्गीशो भस्मरक्षा स्मरान्तकः।
हयग्रीववरोद्धात्री मार्कण्डेयवरप्रदः॥ १९॥

चिन्तामणिगृहावासा मन्दराचलमन्दिरः।
विन्ध्याचलकृतावासा विन्ध्यशैलार्यपूजितः॥ २०॥

मनोन्मनी लिङ्गरूपो जगदम्बा जगत्पिता।
योगनिद्रा योगगम्यो भवानी भवमूर्तिमान्॥ २१॥

श्रीचक्रात्मरथारूढा धरणीधरसंस्थितः।
श्रीविद्यावेद्यमहिमा निगमागमसंश्रयः॥ २२॥

दशशीर्षसमायुक्ता पञ्चविंशतिशीर्षवान्।
अष्टादशभुजायुक्ता पञ्चाशत्करमण्डितः॥ २३॥

ब्राह्म्यादिमातृकारूपा शताष्टेकादशात्मवान्।
स्थिरा स्थाणुस्तथा बाला सद्योजात उमा मृडः॥ २४॥

शिवा शिवश्च रुद्राणी रुद्रश्चैवेश्वरीश्वरः।
कदम्बकाननावासा दारुकारण्यलोलुपः॥ २५॥

नवाक्षरीमनुस्तुत्या पञ्चाक्षरमनुप्रियः।
नवावरणसम्पूज्या पञ्चायतनपूजितः॥ २६॥

देहस्थषट्चक्रदेवी दहराकाशमध्यगः।
योगिनीगणसंसेव्या भृग्वादिप्रमथावृतः॥ २७॥

उग्रताराघोररूपः शर्वाणी शर्वमूर्तिमान्।
नागवेणी नागभूषो मन्त्रिणी मन्त्रदैवतः॥२८॥

ज्वलज्जिह्वा ज्वलन्नेत्रो दण्डनाथा दृगायुधः।
पार्थाञ्जनास्त्रसन्दात्री पार्थपाशुपतास्त्रदः॥२९॥

पुष्पवच्चक्रताटङ्का फणिराजसुकुण्डलः।
बाणपुत्रीवरोद्धात्री बाणासुरवरप्रदः॥३०॥

व्यालकञ्चुकसंवीता व्यालयज्ञोपवीतवान्।
नवलावण्यरूपाढ्या नवयौवनविग्रहः॥३१॥

नाट्यप्रिया नाट्यमूर्तिस्त्रिसन्ध्या त्रिपुरान्तकः।
तन्त्रोपचारसुप्रीता तन्त्रादिमविधायकः॥३२॥

नववल्लीष्टवरदा नववीरसुजन्मभूः।
भ्रमरज्या वासुकिज्यो भेरुण्डा भीमपूजितः॥३३॥

निशुम्भशुम्भदमनी नीचापस्मारमर्दनः।
सहस्राराम्बुजारूढा सहस्रकमलार्चितः॥३४॥

गङ्गासहोदरी गङ्गाधरो गौरी त्रियम्बकः।
श्रीशैलभ्रमराम्बाख्या मल्लिकार्जुनपूजितः॥३५॥

भवतापप्रशमनी भवरोगनिवारकः।
चन्द्रमण्डलमध्यस्था मुनिमानसहंसकः॥३६॥

प्रत्यङ्गिरा प्रसन्नात्मा कामेशी कामरूपवान्।
स्वयम्प्रभा स्वप्रकाशः कालरात्री कृतान्तहृत्॥३७॥

सदान्नपूर्णा भिक्षाटो वनदुर्गा वसुप्रदः।
सर्वचैतन्यरूपाढ्या सच्चिदानन्दविग्रहः॥३८॥

सर्वमङ्गलरूपाढ्या सर्वकल्याणदायकः।
राजराजेश्वरी श्रीमद्राजराजप्रियङ्करः॥३९॥

अर्धनारीश्वरस्येदं नाम्नामष्टोत्तरं शतम्।
पठन्नर्चन् सदा भक्त्या सर्वसाम्राज्यमाप्नुयात्॥४०॥

॥इति श्रीस्कान्दपुराणे श्री-अर्धनारीश्वराष्टोत्तरशतनामस्तोत्रं सम्पूर्णम्॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Ardhanarishvara_Ashtottara_Shatanama_Stotram.

generated on **July 19, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits